सुन्दरकाण्ड षष्ठः सर्गः(७) - ॥ रावणगृह प्रवेशनम् ॥

स निकामं विमानेषु विषण्णः कामरूप धृक् ।
विचचार पुनर्लङ्कां लाघवेन समन्वितः ॥ १ ॥

आससा दाथ लक्ष्मीवान् राक्षसेन्द्र निवेशनम् ।
प्राकारे णार्क वर्णेन भास्वरेणाभि संवृतम् ॥ २ ॥

रक्षितं राक्षसै र्घोरैः सिंहैरिव महद्वनम् ।
समीक्षमाणो भवनं चकाशे कपि कुञ्जरः ॥ ३ ॥

रूप्य कोपहितैश् चित्रैः तोरणैर् हेमभूषितैः ।
विचित्राभिश्च कक्ष्याभिर् द्वारैश्च रुचिरै र्वृतम् ॥ ४ ॥

गजास्थितैर् महामात्रैः शूरैश्च विगत श्रमैः ।
उपस्थित मसंहार्यैर् हयैः स्यन्दनयायिभिः ॥ ५ ॥

सिंह व्याघ्र तनुत्राणैर् दान्त काञ्चन राजतैः ।
घोषवद्भिर् विचित्रैश्च सदा विचरितं रथैः ॥ ६ ॥

बहुरत्न समाकीर्णं परार्ध्यासन भाजनम् ।
महारथ समावासं महारथ महास्वनम् ॥ ७ ॥

दृश्यैश्च परमोदारैस्तैस् तैश्च मृग पक्षिभिः ।
विविधैर्बहु साहस्रैः परिपूर्णं समन्ततः ॥ ८ ॥

विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम् ।
मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ ९ ॥

मुदित प्रमदा रत्नं राक्षसेन्द्र निवेशनम् ।
वराभरणसंह्रादैः समुद्र स्वन निःस्वनम् ॥ १० ॥

तद्राज गुण सम्पन्नं मुख्यैश् चागरु चन्दनैः ।
महाजनैः समाकीर्णं सिंहैरिव महद्वनम् ॥ ११ ॥

भेरी मृदङ्ग भिरुतं शङ्ख घोष निनादितम् ।
नित्यार्चितं पर्वहुतं पूजितं राक्षसैः सदा ॥ १२ ॥

समुद्रमिव गम्भीरं समुद्रमिव निःस्वनम् ।
महात्मनो महद्वेश्म महारत्न परिच्छदम् ॥ १३ ॥

महारत्न समाकीर्णं ददर्श स महाकपिः ।
विराजमानं वपुषा गजाश्व रथ सङ्कुलम् ॥ १४ ॥

लङ्काभरण मित्येव सोऽमन्यत महाकपिः ।
चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥

गृहाद्गृहं राक्षसाना मुद्यानानि च वानरः ।
वीक्षमाणो ह्यसन्त्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥

अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम् ।
ततोऽन्यत्पुप्लुवे वेश्म महा पार्श्वस्य वीर्यवान् ॥ १७ ॥

अथ मेघ प्रतीकाशं कुम्भकर्ण निवेशनम् ।
विभीषणस्य च तथा पुप्लुवे स महाकपिः ॥ १८ ॥

महोदरस्य च गृहं विरूपाक्षस्य चैव हि ।
विद्युज् जिह्वस्य भवनं विद्युन्मालेस् तथैव च ॥ १९ ॥

वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ।
शुकस्य च महातेजाः सारणस्य च धीमतः ॥ २० ॥

तथा चेन्द्रजितो वेश्म जगाम हरि यूथपः ।
जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ २१ ॥

रश्मि केतोश्च भवनं सूर्य शत्रोस् तथैव च ।
वज्र कायस्य च तथा पुप्लुवे स महाकपिः ॥ २२ ॥

धूम्राक्षस्य च सम्पातेर् भवनं मारुतात्मजः ।
विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥ २३ ॥

शुक नासस्य वक्रस्य शठस्य विकटस्य च ।
ह्रस्व कर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥ २४ ॥

युद्धोन्मत्तस्य मत्तस्य ध्वज ग्रीवस्य नादिनः ।
विद्युज् जिह्वेन्द्र जिह्वानां तथा हस्तिमुखस्य च ॥ २५ ॥

करालस्य पिशाचस्य शोणिताक्षस्य चैव हि ।
क्रममाणः क्रमेणैव हनुमान् मारुतात्मजः ॥ २६ ॥

तेषु तेषु महार्हेषु भवनेषु महायशाः ।
तेषा मृद्धिमता मृद्धिं ददर्श स महाकपिः ॥ २७ ॥

सर्वेषां समतिक्रम्य भवनानि समन्ततः ।
आससादाथ लक्ष्मीवान् राक्षसेन्द्र निवेशनम् ॥ २८ ॥

रावणस्योप शायिन्यो ददर्श हरिसत्तमः ।
विचरन् हरि शार्दूलो राक्षसीर् विकृतेक्षणाः ॥ २९ ॥

शूलमुद्गर हस्ताश्च शक्ति तोमर धारिणीः ।
ददर्श विविधान् गुल्मांस्तस्य रक्षःपते गृहे ॥ ३० ॥

राक्षसांश्च महाकायान् नाना प्रहरणोद्यतान् ।
रक्तान् श्वेतान् सितांश्चैव हरींश्चापि महाजवान् ॥ ३१ ॥

कुलीनान् रूप सम्पन्नान् गजान्पर गजारुजान् ।
निष्ठितान् गज शिक्षाया मैरावत समान्युधि ॥ ३२

निहन्तॄन्पर सैन्यानां गृहे तस्मिन् ददर्श सः ।
क्षरतश्च यथा मेघान् स्रवतश्च यथा गिरीन् ॥ ३३ ॥

मेघस्तनित निर्घोषान् निर्धर्षान् समरे परैः ।
सहस्रं वाहिनीस्तत्र जाम्बूनद परिष्कृताः ॥ ३४ ॥

हेमजाल परिच्छन्नास् तरुणादित्य सन्निभाः ।
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ ३५ ॥

शिबिका विविधाकाराः स कपिर्मारुतात्मजः ।
लतागृहाणि चित्राणि चित्रशाला गृहाणि च ॥ ३६ ॥

क्रीडा गृहाणि चान्यानि दारु पर्वत कानपि ।
कामस्य गृहकं रम्यं दिवा गृहकमेव च ॥ ३७ ॥

ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ।
स मन्दर गिरि प्रख्यं मयूर स्थान सङ्कुलम् ॥ ३८ ॥

ध्वज यष्टिभि राकीर्णं ददर्श भवनोत्तमम् ।
अनेक रत्न सङ्कीर्णं निधिजालम् समन्ततः ॥ ३९ ॥

धीर निष्ठित कर्मान्तं गृहं भूतपते रिव ।
अर्चिर्भिश् चापि रत्नानां तेजसा रावणस्य च ॥ ४० ॥

विरराजाथ तद्वेश्म रश्मिवा निव रश्मिभिः ।
जाम्बूनद मयान्येव शयनान् यासनानि च ॥ ४१ ॥

भाजनानि च मुख्यानि ददर्श हरि यूथपः ।
मध्वासव कृत क्लेदं मणि भाजन सङ्कुलम् ॥ ४२ ॥

मनोरम मसम्बाधं कुबेर भवनं यथा ।
नूपुराणां च घोषेण काञ्चीनां निनदेन च ॥ ४३ ॥

मृदङ्ग तल घोषैश्च घोषवद्भिर् विनादितम् ।
प्रासाद सङ्घात युतं स्त्री रत्न शत सङ्कुलम् ।
सुव्यूढ कक्ष्यं हनुमान् प्रविवेश महागृहम् ॥ ४४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥ ६ ॥